# श्रीसरस्वतीस्तुतिः

Ragam - Mayamalavagowlai

सरस्वति नमस्तुभ्यं वरदे कामरूपिणि। विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा॥ १॥

या कुन्देन्दु-तुषारहार-धवला या शुभ्र-वस्त्रावृता या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।

या ब्रह्माच्युत-शंकर-प्रभृतिभिर्देवैः सदा पूजिता सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा॥ २॥

दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण।

भासा कुन्देन्दु-शंखस्फटिकमणिनिभा भासमानाऽसमाना सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना॥ ३॥

आशासु राशी भवदंगवल्लि भासैव दासीकृत-दुग्धसिन्धुम्।

मन्दस्मितैर्निन्दित-शारदेन्दुं वन्देऽरविन्दासन-सुन्दरि त्वाम्॥४॥

शारदा शारदाम्बोजवदना वदनाम्बुजे। सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात्॥ ५॥

लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः। एताभिः पाहि तनुभिरष्टभिर्मां सरस्वती॥ ६॥

सरसवत्यै नमो नित्यं भद्रकाल्यै नमो नमः। वेद-वेदान्त-वेदांग- विद्यास्थानेभ्य एव च॥ ७॥

सरस्वति महाभागे विद्ये कमललोचने। विद्यारूपे विशालाक्षि विद्यां देहि नमोस्तु ते॥ ८॥

यदक्षर-पदभ्रष्टं मात्राहीनं च यद्भवेत्। तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि॥ ९॥

sarasvati namastubhyaṁ varade kāmarūpiṇi |
vidyārambhaṁ kariṣyāmi siddhirbhavatu me sadā ||1||
yā kundendu-tuṣārahāra-dhavalā yā śubhra-vastrāvṛtā

yā vīṇāvaradaṇḍamaṇḍitakarā yā śvetapadmāsanā |

yā brahmācyuta-śaṃkara-prabhṛtibhirdevaiḥ sadā pūjitā

sā māṃ pātu sarasvatī bhagavatī niḥśeṣajāḍyāpahā ||2||

dorbhiryuktā caturbhiḥ sphaṭikamaṇimayīmakṣamālāṃ dadhānā

hastenaikena padmaṃ sitamapi ca śukaṃ pustakaṃ cāpareṇa |

bhāsā kundendu-śaṃkhasphaṭikamaṇinibhā bhāsamānā'samānā

sā me vāgdevateyaṃ nivasatu vadane sarvadā suprasannā ||3||

āśāsu rāśī bhavadaṃgavalli bhāsaiva dāsīkṛta-dugdhasindhum .
mandasmitairnindita-śāradenduṃ vande'ravindāsana-sundari tvām ||4||
śāradā śāradāmbojavadanā vadanāmbuje |
sarvadā sarvadāsmākaṃ sannidhiṃ sannidhiṃ kriyāt ||5||
lakṣmīrmedhā dharā puṣṭirgaurī tṛṣṭiḥ prabhā dhṛtiḥ |
etābhiḥ pāhi tanubhiraṣṭabhirmāṃ sarasvatī ||6||
sarasavatyai namo nityaṃ bhadrakālyai namo namaḥ |
veda-vedānta-vedāṃga- vidyāsthānebhya eva ca ||7||
sarasvati mahābhāge vidye kamalalocane |
vidyārūpe viśālākṣi vidyāṃ dehi namostu te ||8||
yadakṣara-padabhraṣṭaṃ mātrāhīnaṃ ca yadbhavet |
tatsarvaṃ kṣamyatāṃ devi prasīda parameśvari ||9||

ஸரஸ்வதி நமஸ்துப்4யம் வரதே3 காமரூபிணி |
வித்3யாரம்ப4ம் கரிஷ்யாமி ஸித்3தி4ர் ப4வதுமே ஸதா3 ||1||

யா குந்தே3ந்து3-துஷாரஹார-த4வலா யா ஶுப்4ர-வஸ்த்ராவ்ரு’தா
யா வீணாவரத3ண்ட3மண்டி3தகரா யா ஶ்வேதபத்3மாஸனா |
யா ப்3ரஹ்மாச்யுத-ஶங்கர-ப்ரப்4ரு’திபி4ர்தே3வை: ஸதா3 பூஜிதா
ஸா மாம்’ பாது ஸரஸ்வதீ ப4க3வதீ நி:ஶேஷஜாட்3யாபஹா ||2||

தோ3ர்பி4ர்யுக்தா சதுர்பி4: ஸ்ப2டிகமணிமயீமக்ஷமாலாம்’ த3தா4னா
ஹஸ்தேனைகேன பத்3மம்’ ஸிதமபி ச ஶுகம்’ புஸ்தகம்’ சாபரேண |
பா4ஸா குந்தே3ந்து3-ஶங்க2ஸ்ப2டிகமணினிபா4 பா4ஸமானா(அ)ஸமானா
ஸா மே வாக்3தே3வதேயம்’ நிவஸது வத3னே ஸர்வதா3 ஸுப்ரஸன்னா ||3||

ஆஶாஸு ராஶீ ப4வத3ங்க3வல்லி பா4ஸைவ தா3ஸீக்ரு’த-து3க்3த4ஸிந்து4ம் |
மந்த3ஸ்மிதைர்னிந்தி3த-ஶாரதே3ந்து3ம்’ வந்தே3(அ)ரவிந்தா3ஸன-ஸுந்த3ரி த்வாம் ||4||

ஶாரதா$^3$ ஶாரதா$^3$ம்போ$^3$ஜவத$^3$னா வத$^3$னாம்பு$^3$ஜே |

ஸர்வதா$^3$ ஸர்வதா$^3$ஸ்மாகம்’ ஸன்னிதி$^4$ம்’ ஸன்னிதி$^4$ம்’ க்ரியாத் ||5||

லக்ஷ்மீர்மேதா$^4$ த$^4$ரா புஷ்டிர்கௌ$^3$ரீ த்ரு’ஷ்டி: ப்ரபா$^4$ த்$^4$ரு’தி: |

ஏதாபி$^4$: பாஹி தனுபி$^4$ரஷ்டபி$^4$ர்மாம்’ ஸரஸ்வதீ ||6||

ஸரஸ்வத்யை நமோ நித்யம்’ ப$^4$த்$^3$ரகால்யை நமோ நம: |

வேத$^3$-வேதா$^3$ந்த-வேதா$^3$ங்க$^3$- வித்$^3$யாஸ்தா$^2$னேப்$^4$ய ஏவ ச ||7||

ஸரஸ்வதி மஹாபா$^4$கே$^3$ வித்$^3$யே கமலலோசனே |

வித்$^3$யாரூபே விஶாலாக்ஷி வித்$^3$யாம்’ தே$^3$ஹி நமோஸ்து தே ||8||

யத$^3$க்ஷர-பத$^3$ப்$^4$ரஷ்டம்’ மாத்ராஹீனம்’ ச யத்$^3$ப$^4$வேத் |

தத்ஸர்வம்’ க்ஷம்யதாம்’ தே$^3$வி ப்ரஸீத$^3$ பரமேஶ்வரி ||9||